IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# श्रीमद्देवीभागवते मानसयज्ञस्य वैशिष्ट्यम्

**DSV Jagannatha Sharma**
Assistant Professor
Kalpa Department
S.V. Vedic University
Tirupati

**प्रस्तावना**

**पुराणानामाविर्भावः**

द्वापरान्ते विष्णोरंशेन पराशरात् सत्यवत्यामवतीर्यः भगवान् व्यासः वेदसारं सङ्गृह्य पुराणसंहितां निर्माय स्वशिष्यं सूतमध्यापयामास। कलियुगे विप्राः मन्दबुद्धयः, अल्पायुषः भविष्यन्तीति मत्वा, तेषां तारणार्थमेव परमदयालुना भगवता बादरायणेन पुराणानि विरचितानि। तदुक्तम् –

**द्वापरे समनुक्रान्ते तृतीये युगपर्यये।**
**जातः पराशरद्योगी वासव्या कलया हरेः।।**[1]

कलियुगे मानवाः युगप्रभावात् मन्दबुद्धयः अल्पायुषश्च भवन्ति। वेदार्थश्च तेषां दुर्ग्राह्ये भवति। किञ्च प्रभुशासनात् "सत्यं वद, धर्मं चरे"त्यादि वेदवाक्यैरेव अस्मिन् युगे न सर्वे सत्यवादिनः धार्मिकाश्च भवन्ति। अतः पुराणकथाभिः मित्रसम्मितोपदेशः आवश्यकाः सञ्जातः। एवं मित्रसम्मितत्वेन पुरावृत्तान्ताख्यानैः वेदोक्त धर्माचरणे प्रवर्तकतया पुराणवाङ्मयं लोकस्य महदुपकरोति। एवं रीत्या प्रभुसम्मितत्वात् वेदे सर्वेषां जनानां प्रवृत्तिः न भवतीति मित्रसम्मितं पुराणवाङ्मयं विरचितम्।

**पुराणशब्दस्य व्युत्पत्तिः**

पुराणशब्दस्य बहुषु ग्रन्थेषु बहुविधानि निर्वचनानि दृश्यन्ते। "पुरा अपि नवं भवतीति" यास्काचार्यैरुक्तः[2]। पूर्वकाले स्थितं वृत्तान्तं ज्ञापयतीति ब्रह्माण्डपुराणे कथितः।

**यस्मात् पुराह्यनक्तीदं पुराणं तेन तत् स्मृतम्।**
**निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते।।**[3]

**पुराणलक्षणं**

अमरकोशे पुराणस्य लक्षणमित्थं दृश्यते –

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चैव पुराणं पञ्चलक्षणम्।।**[4]

---

1. भागवतम् – 1-4-14
2. निरुक्तं – 3-19
3. ब्रह्माण्डपुराणं – 1-1-173
4. अमरकोशः – 1-162

अर्थात् यत्र ब्रह्मणः सृष्टिः, लयः, पौत्रपरम्परानुगतशरीरसङ्घातप्रवाहरूपः वंशः, अनुवंशादि मन्वन्तराणि, तत्काले धर्मस्य स्थितिः, चन्द्रादि वंशसञ्जातानां महापुरुषाणां चरित्रं चेति पञ्चलक्षणैः युक्तमेव पुराणशब्दवाच्यं भवति। एतेषां सर्वेषां परिशीलनेन इत्थं वक्तुं शक्यते यत् पुराणं नाम अत्यन्तप्राचीनदिव्यकथाविवरणात्मकम्।

**पुराणानां वेदोपबृंहकत्वम्**

श्रुतिः मानवानां कालत्रयेऽपि आदर्शमयजीवनाय शुभप्रेरणां ददाति। वैदिकधर्मकर्माचरणेन, स्वधर्माचरणेन, ईश्वरानुग्रहद्वारेण अखण्डानन्दप्राप्तिमार्गः उपदिश्यते। वाल्मीकिव्यासादयो महर्षयः तपोबलेन वेदानां यथार्थमर्थं ज्ञात्वा कथारूपेण पुराणानि व्यरचयन्। तदुक्तम् –

**आख्यानैश्चाप्युपाख्यानैः गाथाभिः कल्पशुद्धिभिः।**
**पुराणसंहितां चक्रे पुराणार्थविशारदः।।**[1]

सर्वासां पौराणिककथानां मूलं भवति वेदाः एव। पुराणेषु यद्वर्तते तत्सर्वमपि वेदमन्त्राणां विस्तृतव्याख्यैव। पुराणेषु वेदात् कथमपि भिन्नता नास्ति। कथनपद्धतावेव भेदः। अतः पुराणेषु वेदार्थानां विवरणात् वेदपुराणयोः एकार्थबोधकत्वं सिद्धम्।

**अष्टादशमहापुराणानि**

द्वापरान्ते विष्णोरंशेन सञ्जातः भगवान् व्यासः वेदस्य विभागं कृत्वा वेदव्यासः इत्यन्वर्थं नाम लब्ध्वा कलियुगे मनुष्याणां मन्दबुद्धित्वात् तेषां वेदार्थः दुर्ग्रह इति मत्वा तेषां तरणार्थमेव पुराणानि व्यरचयत्। तान्येव अष्टादशपुराणानीति व्यवह्रियन्ते। देवीभागवते एकस्मिन् श्लोके अष्टादशपुराणानां गणना सङ्क्षेपेण एवं कृताऽस्ति –

**मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।**
**अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते।।**[2]

यथा –

मद्वयम् -मत्स्यमार्कण्डेयपुरणे
भद्वयम् – भागवतभविष्यपुराणे
ब्रत्रम् – ब्रह्मब्रह्माण्डब्रह्मवैवर्तपुराणानि
वचतुष्टयम् – वायुवामनवराहविष्णुपुराणानि
अनापलिङ्गकूस्कानि – अग्निनारदपद्मलिङ्गगरुडकूर्मस्कान्दाश्च।

एवमष्टादशसङ्ख्यानीति पुराणानि परिगणितानि। श्रीमद्भागवतेऽपि पुराणानां परिगणना इत्थं दृश्यते –

**ब्राह्मं पाद्मं वैष्णवं च वायवीयं तथैव च।**
**भागवतं नारदीयं मार्कण्डेयं च कीर्तितम्।।**
**आग्नेयं च भविष्यं च ब्रह्मवैवर्तलिङ्गके।**
**वाराहं च तथा स्कान्दं वामनं कूर्मसंज्ञकम्।।**
**मात्स्यं च गारुडं तद्वत् ब्रह्माण्डाख्यमिति त्रिषट्।।**[3]

एवं व्यासेन रचितानि अष्टादशपुराणानि मित्रसम्मितत्वेन वेदार्थोपबृंहकाणि विद्यन्ते। सर्वेषामपि स्त्रीशूद्रद्विजबन्धूनां सम्यगुपकुर्वन्ति।

---

1. विष्णुपुराणं -3-6-15
2. देवीभागवतम् – 1-3-2
3. भागवतपुराणं – 12-7-23,24,25

पुराणवाङ्मये श्रीमद्देवीभागवतमहापुराणस्य विशिष्टं स्थानं वर्तते। पुराणपरिगणनायां वेदतुल्यं पवित्रसर्वलक्षणयुक्तपुराणेषु पुराणमिदं पञ्चमस्थानं भजते। शक्त्युपासकाः पुराणमिदं शाक्तभागवतत्वेनाहूयन्ते। पुराणेऽस्मिन् सर्वत्र शक्तितत्त्वं प्रतिपादितमस्ति। भगवत्याः लीलाकथाविशेषाणां प्रतिपादनमेव ग्रन्थस्यास्य मुख्योद्देश्यमस्ति। मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव इति श्रुतिवाक्येष्वपि प्रथमस्थानं मात्रे दत्तमस्ति। अम्बा एव सर्वशक्तिमयी, जगन्माता, सम्पूर्णलोककल्याणकारिणी, मार्गप्रदात्री च भवति। अस्य जगतः सृष्टि-स्थिति-संहारकारिणी आदिनारायणी शक्तिरेव। इयमेव महाशक्तिः नवदुर्गरूपेण, दशमहाविद्यारूपेण च प्रतिष्ठिता। तथैव अन्नपूर्णा, जगद्धात्री, कात्यायनी, ललिता, अम्बा, गायत्री, भुवनेश्वरी, काली, तारा, बगला, षोडशी, त्रिपुरा, धूमावती, मातङ्गी, कमला, पद्मावती, दुर्गा इत्यादयः देव्यः सर्वाः भगवत्याः प्रतिरूपा एव। शक्तिक्रीडा जगत्सर्वम् इति सम्पूर्णं जगदिदं शक्त्याः क्रीडेति अभिप्रायः। श्रीमद्देवीभागवतस्य सारः भवति यत् संसारसुखेषु वैराग्यजनकत्वं, संसारबन्धनात् मुक्तिश्च, तदर्थं अम्बायाः पादचरणे एव शरण्यमिति विज्ञायते।

**यज्ञस्य स्वरूपम्**

इज्यन्ते देवता अत्र यज देवपूजादौ नङ् प्रत्यये यज्ञः सिध्यति। यज्ञ एव सर्वकर्मसु श्रेष्ठकर्मरूपेण ब्राह्मणग्रन्थेषु विराजते। विश्वस्य सर्वश्रेष्ठतमो देवः प्रजापतिः यज्ञस्वरूप एव। यज्ञादेव सर्वसृष्टिः आविर्भूता इति आर्योक्तिः। यज्ञः देवमानवयोर्मध्ये सम्बन्धस्थापनमार्गमित्यभिधीयते। अग्निदेवस्य स्तुत्या एव यज्ञः प्रारभ्यते।

श्रीमद्देवीभागवते देवीयज्ञः, अम्बायज्ञः, मानसिकयज्ञः इत्याद्यनेकानां यज्ञानां विवरणमस्ति।

**मानसयज्ञविश्लेषणम्**

ज्ञानिभिः वैराग्यजनैः क्रियमाणो यज्ञः मानसयज्ञः भवति। अस्मिन् यज्ञे ज्ञानिनः, महापुरुषाश्च स्वमनसि कल्पनां कृत्वा विशालमण्टपं, यज्ञदेवीञ्च निर्मीयन्ते। अस्मिन् यज्ञे यज्ञवस्तूनाम् आवश्यकता नास्ति। केवलं शुद्धहृदयमेवापेक्षते। यज्ञोऽयं संसारे मोहं निर्मूल्य ईश्वरे लीनरूपेण मार्गं प्रदास्यतीति ज्ञेयः। यज्ञस्यास्य महिमावर्णनं ऋग्वेदे, धर्मग्रन्थेषु, पुराणेषु च दृश्यते।

**श्रीमद्देवीभागवते मानसयज्ञप्रस्तावना**

श्रीमद्देवीभागवते तृतीयस्कन्धे द्वादशाध्याये मानसयज्ञस्य महिमा उपवर्णिताऽस्ति। जनमेजयव्यासप्रश्नोत्तरसंवादे मानसयज्ञस्य प्रसङ्गो दृश्यते। पूर्वं नारदेन कृत संवादविषयाः व्यासः जनमेजयमुपदिदेश। जनमेजयः व्यासं प्रति यज्ञस्वरूपं, यज्ञविधिं च सम्यक् वर्णनं करोत्विति प्रार्थयामास। तदा व्यासमहर्षिः यज्ञस्य पूजाविधिः, मन्त्राः, होमद्रव्याणि, कति संख्याकाः ब्राह्मणा अपेक्षन्ते, दक्षिणाविषये च सर्वमेवं निवेदयति –

**श्रृणु राजन् प्रवक्ष्यामि देव्या यज्ञं विधानतः।**
**त्रिविधं तु सदा ज्ञेयं विधिदृष्टेन कर्मणा।।**[1]

यज्ञाः सात्त्विक – राजस – तामसभेदेन त्रिविधाः भवन्ति। तत्र मनुष्याणां कृते सात्त्विकयज्ञः, राज्ञां कृतं राजसयज्ञः, राक्षसानां कृते तामसयज्ञः उक्तमस्ति। तथा ज्ञानिनां कृते निर्गुणयज्ञः, वैराग्ययुक्तजनानां कृते ज्ञानमययज्ञश्च विधीतमस्ति। यस्मिन् यज्ञे देश-काल-द्रव्य-मन्त्र-ब्राह्मण-श्रद्धादयः भवन्ति स यज्ञः सात्त्विकयज्ञ इति, यज्ञोऽयं वानप्रस्थाश्रमे स्थितानां मुनिजनानां कृते विहितमस्ति। यस्मिन् यज्ञे क्षत्रियाः, वैश्याः अधिकधनव्ययः, सयूपाः उपयुज्यन्ते स यज्ञः राजसयज्ञ इति कथ्यते। दानवैः क्रियमाणो यज्ञः तामसयज्ञ इति कथ्यते। यज्ञोऽयं क्रोधयुक्तो अंहकारवर्धको भवति। ये मोक्षमिच्छन्ति ते विरक्तयः, महात्मानः सर्वे सर्वसाधनसम्पन्नाः मानसयज्ञं चिकीर्षन्ति।

1. श्रीमद्देवीभागवतम् – 3-12.3

**मुनीनां मोक्षकामानां विरक्तानां महात्मनाम्।**

**मानसस्तु स्मृतो यागः सर्वसाधनसंयुतः।।**[1]

**मानसयज्ञविधिः**

अन्येषु सर्वेषु यज्ञेषु द्रव्य – श्रद्धा - कर्म – ब्राह्मण – देश – काल – द्रव्यसाधनानि अपेक्षन्ते। परन्तु मानसयज्ञः विना द्रव्यैः परिपूर्णयज्ञो भवति।

सर्वप्रथममस्मिन् यज्ञे मनः शोध्यं, गुणवर्जितं भवितव्यम्। मनश्शुद्धयनन्तरं शरीरशुद्धिरपि स्वतः भविष्यतीत्यत्र नास्ति संशयः। यदा मनुष्याणां मनसेन्द्रियविषयेषु आसक्तिर्न्यूना भवेत् तदा मानसयज्ञकरणाय अधिकारं प्राप्तवानिति विज्ञेयम् -

**इन्द्रियार्थपरित्यक्तं यदा जातं मनः शुचि।**

**तदा तस्य मखस्यासौ प्रभवेदधिकारवान्।।**[2]

तत्पश्चात् स यज्ञशीलः मनसि एव बहुयोजनविस्तृतम् मण्डपं निर्माय, अनेक सुन्दरस्तम्बैः अलंकृत्य श्लक्ष्णैः यज्ञीयद्रुमसम्भवैः विशालयज्ञवेदीं कल्पनां कृत्वा तस्मिन् मानसिकाग्निं विधिपूरयं न्यसेत्।

एवमेव प्रकारेण ब्राह्मणां वरणं कृत्वा ब्रह्मा – अध्वर्यु – होता – प्रस्तोता – उद्गाता – प्रतिहर्ता – अन्यसम्भासदः प्रयत्नपूर्वकं मनसि पूजां कुर्यात्। प्राण – अपान – व्यान – समान – उदानेति पञ्चाग्नीन् यज्ञवेदिकायां विधानपूर्वकं प्रतिष्ठापनीयम्।

**प्राणोऽपानस्तथा व्यानः समनोदान एव च।**

**पावकाः पञ्च एवैते स्थाप्या वेद्यां विधानतः।।**

अत्र प्राण एव गार्हपत्याग्निरिति, अपान एव आहवनीयाग्निरिति, व्यान एव दक्षिणाग्निरिति, समान एव आवसथ्याग्निरिति, उदान एव सभ्याग्निरिति च कथ्यते। एते पञ्चाग्नयः परमतेजस्विनो भवन्ति। अस्मिन् यज्ञे मानसिकरूपेण दोषरहितपरमपवित्र-सामग्र्याः कल्पना करणीया। अस्मिन् यज्ञे होता तथा यजमानश्चेत्येषां रूपेण मनः एव तिष्ठति। निर्गुणः, अविनाशी ब्रह्मा अस्मिन् यज्ञे अधिदेवतारूपेण भवति।

**मन एव तदा होता यजमानस्तथैव तत्।**

**यज्ञाधिदेवता ब्रह्म निर्गुणं च सनातनम्।।**[3]

निर्गुणा पराशक्तिरेव सर्वफलदात्री भवति। ताम् वैराग्यदायिनीं, कल्याणकारिणीं, ब्रह्मविद्यां, समस्तजगतः आधारस्वरूपां, जगद्व्याप्तां, सर्वस्वरूपिणीं भगवतीं प्रसन्नकरणोद्देशेन द्विजः मनः कल्पित हवनसामग्रीम् आहुतिरूपेण प्राणरूपाग्नौ समर्पणीयः।

**फलदा निर्गुणा शक्तिः सदा निर्वेददा शिवा।**

**ब्रह्मविद्याखिलाधारा व्याप्य सर्वत्र संस्थिता**

**तदुद्देशेन तद् द्रव्यं हुनेत्प्राणाग्निषु द्विजः।**

**पश्चाच्चित्तं निरालम्बं कृत्वा प्राणानपि प्रभो।।**[4]

1. श्रीमद्देवीभागवतम् – 3.12.39
2. श्रीमद्देवीभागवतम् – 3.12.43
3. श्रीमद्देवीभागवतम् - 3.12.51
4. श्रीमद्देवीभागवतम् – 3.12-42,43

मानसहवनानन्तरं स्वमनसालम्बनं कृत्वा कुण्डलिन्याः मुखमार्गात् नाम सुषुम्नारन्ध्रद्वारा शाश्वतब्रह्मणि स्वप्राणान् आहुतिं देयम्। स्वस्य अनुभूत्या स्वयं साक्षात् कृत्वा तथा महेश्वरमेव आत्मस्वरूपमिति ज्ञात्वा च समाधियोगात् शान्तचित्तो भूत्वा ध्यानं करणीयम्। एवं प्रकारेण साधकः सर्वप्राणिषु स्वात्मानं, स्वात्मनि सर्वप्राणीन् द्रष्टुं शक्नोति। तदा स साधकः कल्याणस्वरूपायाः भगवत्याः दर्शनं प्राप्स्यति। तस्याः सच्चिदानन्दस्वरूपिण्याः दर्शनं प्राप्य सः यजमानः ब्रह्मज्ञानी भवेत्। तदा तस्य मायाजनितप्रपञ्चः दग्धं भूत्वा केवलं प्रारब्धकर्मभोगाय शरीरमेव अवशिष्यते।

**तदा मायादिकं सर्वं दग्धं भवति भूमिप।**
**प्रारब्धं कर्ममात्रं तु यावद्देहं च तिष्ठति।।**[1]

हे राजन्! तदा स जीवः जीवन्मुक्तो भविष्यति। मृत्योरनन्तरं मोक्षप्राप्तिः सिध्यति। यो भगवन्तं सेवते सः सर्वप्रकारेण कृतकत्यो भवेत्। अतः गुरुवचनमनुसृत्य सम्पूर्णप्रयत्नं कृत्वा श्रीभुवनेश्वर्याः भगवत्याः ध्यानं, चरित्रश्रवणं, मनध्यासनं च करणीयम्।

अयं यज्ञः मोक्षप्रदः इत्यत्र नास्ति संशयः। अस्यातिरिक्तत्वेन अन्यसकामयज्ञाः विनाशोन्मुखाः भवन्ति।

**राजन्नेव कृतो यज्ञो मोक्षदो नात्र संशयः।**
**अन्ये यज्ञाः सकामास्तु प्रभवन्ति क्षयोन्मुखाः।।**[2]

मनीषिणः, विद्वांसश्च कथयन्ति यत् ये स्वर्गमिच्छन्ति ते विधिपूर्वकम् अग्निष्टोमयज्ञं करणीयम्। परन्तु पुण्यक्षयानन्तरं पुनः मृत्युलोकं विशन्त्येव। अतः अक्षयफलदायी मानसयज्ञ एव सर्वयज्ञेषु श्रेष्ठतयः इति निश्चयः।

**उपसंहारः**

यज्ञेषु मानसयज्ञस्य श्रेष्ठत्वं श्रीमद्देवीभागवते सुष्टु प्रतिपादितमस्ति। अतः अन्ययज्ञानामपेक्षया मानसयज्ञ एव श्रेष्ठ इति नास्ति संशयो लेशः।

**आधारग्रन्थसूची**

1. देवीभागवतम् – सुब्रह्मण्यशास्त्री, वेङ्कटेश्वरार्ष भारतीट्रस्ट्, हैदराबाद्।
2. पुराणपर्यालोचनम् – डा. श्रीकृष्णमणित्रिपाठी, चौखम्बा सुरभारती, वाराणासी।
3. संस्कृतवाङ्मयचरितम् – रामचन्द्रमिश्रः, चौखाम्बाविद्याभवन्, वाराणासी।

1. श्रीमद्देवीभागवतं – 3.12-57
2. श्रीमद्देवीभागवतं - 3.12-60